07-12-2020

उपशास्त्री I

संस्कृतसामान्यम् ।
अनिवार्यप्रथमपत्रम् ।

√पा - (पिब्) - पीना, धात्वाधारितवाक्यानि ।

लट्लकारे → सः दुग्धं पिबति । तौ दुग्धं पिबतः । ते दुग्धं पिबन्ति ।
वर्तमानकाल: त्वं दुग्धं पिबसि । युवां दुग्धं पिबथः । यूयं दुग्धं पिबथ ।
अहं दुग्धं पिबामि । आवां दुग्धं पिबावः । वयं दुग्धं पिबामः ।

लोट् लकारे → सः दुग्धं पिबतु । तौ पिबताम् । ते पिबन्तु ।
आज्ञार्थक: त्वं पिब । युवां जलं पिबतम् । यूयं पिबत ।
अहं चायं पिबानि । आवां पिबाव । वयं पिबाम ।

लङ्लकारे →
भूतकाल: बालकः जलम् अपिबत् । बालकौ अपिबताम् । बालकाः अपिबन् ।
त्वं जलम् अपिबः । युवां दुग्धं अपिबतम् । यूयं क्षीरं अपिबत ।
अहं निम्बुमिश्रितं जलम् अपिबम् । आवां अपिबाव । वयम् अपिबाम ।

विधिलिङ्गे → छात्रः पिबेत् । छात्रौ पिबेताम् । छात्राः पिबेयुः ।
इच्छार्थक: त्वं पिबेः । युवां पिबेतम् । यूयं पिबेत ।
अहं पिबेयम् । आवां पिबेव । वयं पिबेम ।

लृटलकारे →
भविष्यत्काल: बालिका पास्यति । बालिके पास्यतः । बालिकाः पास्यन्ति ।
श्रीमान् जलं पास्यति । श्रीमन्तौ जलं पास्यतः । श्रीमन्तः पास्यन्ति ।
धेनुः जलं पास्यति । धेनू पास्यतः । धेनवः पास्यन्ति ।
वत्सः दुग्धं पास्यति । वत्सौ पास्यतः । वत्साः पास्यन्ति ।
त्वं निम्बुजलं पास्यसि । युवां पास्यथः । यूयं पास्यथ ।
अहं पास्यामि । आवां औषधिं पास्यावः । वयं पास्यामः ।

07-12-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

07-12-2020

साहित्यम् । शास्त्री

## छन्दनिर्णयः ।

"धीरोदात्तमहत्तमो गुणनिधिर्यस्मिन्नसौ नायको
यत्रामूर्तिपरो निरन्तरबलवत्प्रेमप्रकाशाक्षरः ।
यत्रानेकमहामहोत्तमधियां चारित्रमन्तर्गतं
तच्चैतन्यचरित्रवर्णनमिदं जीयादजस्रं भुवि ॥"

श्रीलकवि कर्णपूर / श्रीकृष्णचैतन्यचरितामृतम् → १०-४७

अस्मिन् पद्ये प्रत्येके चरणे ऊनविंशत्यक्षराः सन्ति ।
अतिधृतिजात्या पद्यमिदम् ।
यगणादिनिर्णयः →
धीरोदात्तमहत्तमो गुणनिधिर्यस्मिन्नसौ नायको ,

| S S S | I I S | I S I | I I S | S S I | S S I | S |
|---|---|---|---|---|---|---|
| मगण | सगण | जगण | सगण | तगण | तगण | गुरु |

अथातिधृत्याः भेदं शार्दूलविक्रीडितं नाम छन्दः । तल्लक्षणम् →

"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।"
लक्षणपरीक्षा → सगुरवः - गुरुणैकेन सहिताः , मसजस्तताः - मगण, सगण, जगण, सगण, तगणद्वयाश्च स्युः । •
सूर्यैः - द्वादशभिः अक्षरैः , अश्वैः - सप्तभिः अक्षरैः यतिः भवेत् ।

07-12-2020

डॉ० निर्मल कुमार झा , ( सं० प्राचार्यः ) ।
रा० उ० सं० महावि० सुखसेना , पूर्णियाँ ।

07-12-2020

संस्कृतसामान्यम् ।

अनिवार्यप्रथमपत्रम् ।

उपशास्त्री II

## शब्दरूपाणि ।

### विद्वस् (विद्वान्, हलन्त, पुल्लिंग)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीया | विद्वांसम् | ,, | विदुषः |
| तृतीया | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| चतुर्थी | विदुषे | ,, | विद्वद्भ्यः |
| पञ्चमी | विदुषः | ,, | ,, |
| षष्ठी | ,, | विदुषोः | विदुषाम् |
| सप्तमी | विदुषि | ,, | विद्वत्सु |
| सम्बोधनम् | हे विद्वन् ! | हे विद्वांसौ ! | हे विद्वांसः ! |

07-12-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।